श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री पौण्डरीकपुरम् श्रीमदाण्डवन् आश्रम तनियन् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पौण्डरीकपुरम् श्रीमदाण्डवन् आश्रम तनियन् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ओं अस्मद्गुरुभ्यो नमः।
ओं अस्मत्परमगुरुभ्यो नमः।
ओं अस्मत्सर्वगुरुभ्यो नमः।
ओं श्रीमते वेदान्तगुरवे नमः।
ओं श्रीमते रामानुजाय नमः।
ओं श्री महापूर्णाय नमः।
ओं श्रीमद्यामुनमुनये नमः।
ओं श्रीराममिश्राय नमः।
ओं श्रीपुण्डरीकाक्षाय नमः।
ओं श्रीमन्नाथमुनये नमः।
ओं श्रीमते शठकोपाय नमः।
ओं श्रीमते विष्वक्सेनाय नमः।
ओं श्रियै नमः।
ओं श्रीधराय नमः।

अस्मद्देशिकमस्मदीयपरमाचार्यान् अशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम्॥

रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये॥

अस्मत् गुरु परमगुरून् यतिवर पूर्णौ सयामुनं रामं।
पद्माक्ष नाथ शठजित् सेनेश रमा रमापतीन् वन्दे॥

www.prapatti.com

श्री भाष्यकारः
( भाष्यकारर् )

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणायमेने।
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये॥

श्री महापूर्णः
( पेरियनम्बि )

दया निघ्नं यतीन्द्रस्य देशिकं पूर्णं आश्रये।
येन विश्वसृजो विष्णोः अपूर्यत मनोरथः॥

श्रीमत् यामुनमुनिः
( आळवन्दार् )

विगाहे यामुनं तीर्थं साधु बृन्दावने स्थितम्।
निरस्त जिह्मग स्पर्शे यत्र कृष्णःकृतादरः॥

श्री राममिश्रः
( मणक्काल्नम्बि )

अनुज्झित क्षमायोगं अपुण्यजन बाधकम्।
अस्पृष्ट मदरागं तं रामं तुर्यमुपास्महे॥

श्री पुण्डरीकाक्षः
( उय्यक्कोन्डार् )

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम्।
शुद्धसत्वमयं शौरेः अवतारमिवापरम्॥

श्रीमत् नाथमुनिः
( नाथमुनिगळ् )

नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्वं हस्तामलकतां गतम्॥

श्रीमत् शठकोपः
( नम्माऴ्वार् )

यस्य सारस्वतस्रोतो वकुळामोद वासितम्।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे॥

श्रीमत् विष्वक्सेनः
( सेनैनाथन् )

वन्दे वैकुण्ठ सेनान्यं देवं सूत्रवती सखम्।
यद्वेत्र शिखरस्पन्दे विश्वमेतद् व्यवस्थितम्॥

श्रीः
( पेरियपिराट्टियार् )

सहधर्मचरीं शौरेः सम्मन्त्रित जगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञात निग्रहाम्॥

श्रियः पतिः
( पेरुमाळ् )

कमप्याद्यं गुरुं वन्दे कमला गृहमेधिनम्।
प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम्॥

एन्नुयिर् तन्दळित्तवरैच्चरणम् पुक्कु
यानडैवे अवर्गुरुक्कळ् निरै वणङ्गि

पिन्नरुळाल् पेरुम्बूदूर् वन्द वळ्ळल्
पेरियनंबि आळवन्दार् मणक्काल् नंबि
नन्नेरियै अवर्क्कुरैत्त उय्यक्कोण्डार्
नाथमुनि शठकोपन् सेनैनाथन्
इन्नमुदत्तिरुमगळ् एन्निवरै मुन्निट्टु
एम्पेरुमान् तिरुवडिगळ् अडैगिन्नेने॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयस्यात् निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥

श्रीमत् रघुवीर महादेशिकः
( रायपुरं आण्डवन् )

श्रीवासयोगिगुरुवर्यकृपात्तचिह्नं
गोपालदेशिकयतेस्समवाप्तबोधम्।
तत्पादपद्मविनिविष्टनिजात्मभारं
भक्त्यादिपूर्णरघुवीरगुरुं प्रपद्ये॥

श्रीमत् गोपालदेशिक महादेशिकः
( परवाक्कोट्टै आण्डवन् )

श्रीवास रङ्गपरकाल मुनित्रयाप्त-
लक्ष्मात्मरक्षणयतित्व युगागमान्तम्।
आचार्यभक्तिपरिपूतमनर्घशीलं
गोपालदेशिकमुनिं गुरुमाश्रयामः॥

श्रीमत् श्रीनिवासमहादेशिकः
( विण्णाट्रङ्करै आण्डवन् )

नारायणाख्ययतिराजपदाब्जभृङ्ग-
श्रीवासयोगिगुरुणार्पितभारमीशे।
भक्त्यादिपूर्णवरदार्यकृपात्तचिह्नं
श्रीश्रीनिवासमुनिवर्यमहं प्रपद्ये॥

श्रीमत् रङ्गनाथमहादेशिकः
( श्रीमन्नार्गुडि आण्डवन् )

आद्यश्रीनिधियोगिलब्धमनुमच्छ्रीवात्स्यरामानुजात्
संप्राप्ताङ्कनमन्त्रजातमपरश्रीवासयोगीश्वरात्।
प्राप्तान्त्याश्रमवेदमौळियुगळं तेनार्पितं श्रीपतौ
ज्ञानाब्धिं सुगुणाकरं मुनिवरं श्रीरङ्गनाथं भजे॥

श्रीमत् श्रीनिवासमहादेशिकः
( पौण्डरीकपुरं आण्डवन् )

श्रीनारायणयोगीन्द्रवरदार्यकृपाश्रयम्।
रङ्गेशपादविनतं श्रीनिवासमुनिं भजे॥

श्रीमत् नारायणमहादेशिकः
( वेळियनल्लूर् आण्डवन् )

श्रीवासयोगीन्द्रकृपात्तबोधं
श्रीशैलरामानुजलब्धचिह्नम्।
वैराग्यभक्त्यादिगुणैकतानं
नारायणाख्यं मुनिमाश्रयामः॥

श्रीमत् श्रीनिवासमहादेशिकः
( श्री पेरियाण्डवन् (वत्तल् स्वामि ))

श्रीरङ्गेशपदे समर्पितभरं श्रुत्यन्तरामानुज
श्रीयोगीन्द्रगुरूत्तमेन यमिनश्श्रुत्यन्तविद्यात्मनः।
प्राप्तश्रुत्यवतंसयुग्महृदयं श्रीवासरामानुजात्
श्रीश्रीवासमुनीन्द्रदेशिकमणिं श्रेयोनिधिं संश्रये॥

श्रीमत् श्रीनिवासरामानुजमहादेशिकः
(तिरुत्तुरैप्पूण्डि आण्डवन् )

श्रीमद्गोपालसूरेर्निरवधिकरुणावाप्तसत्संप्रदायं
श्रीमद्वेदान्तरामानुजयतिनृपतिस्सर्वतः स्थापयित्वा।
यस्मिन्सत्संप्रदायं सकलमुपदिशन्नंशतोऽनुप्रविष्टः
श्रीमत् श्रीवासरामानुजमुनिमनघं तं भजे देशिकेन्द्रम्॥

श्रीमत् वेदान्तरामानुजमहादेशिकः
(श्रीरङ्गम् ( वळुत्तूर् ) आण्डवन् )

गोपालदेशिकपदाब्जमधुव्रतस्य
प्रज्ञाविरक्तिकरुणामुखसद्गुणाब्धेः।
वेदान्तलक्ष्मणमुनेः श्रितभागधेयं
पादारविन्दयुगळं शरणं प्रपद्ये॥

श्रीमत् गोपालार्यमहादेशिकः
(तिरुक्कुडन्दै देशिकन् )

श्रीकृष्णदेशिकपदाम्बुजभृङ्गराजं
वेदान्तलक्ष्मणमुनीन्द्रकृपात्तबोधम्।
त्रय्यन्तदेशिक यतीन्द्र शठारि मूर्तिं
गोपालदेशिकशिखामणिमाश्रयामः॥

## श्रीमत् वेदान्तरामानुजमहादेशिकः
## ( साक्षात् स्वामि )

श्रीरङ्गनाथगुरुपादसरोजहंसं
वेदान्तदेशिकपदाम्बुजभृङ्गराजम्।
श्रीमद्यतीन्द्रशठकोपदयावलम्बं
वेदान्तलक्ष्मणमुनिं शरणं प्रपद्ये॥

कल्याणावहमस्माकं कारुण्यकलशाम्बुधेः।
प्रपद्ये रङ्गनाथस्य पदपङ्कजतल्लजम्॥

वन्दे श्रीरङ्गनाथार्यं श्रीरङ्गपतिदेशिकम्।
श्रीवीरराघवाचार्यं वेङ्कटेशं महागुरुम्॥

रामानुजमनन्तार्यं ताताचार्यपराङ्कुशौ।
अहोबिलाचार्यमहादयाधीशगुरूत्तमौ॥

श्रीमद्वरदविष्ण्वार्यं वात्स्यं वरददेशिकम्।
ब्रह्मतन्त्रस्वतन्त्रार्यं श्रीमद्वेदान्तदेशिकम्॥

वादिहंसांबुवाहार्यं रङ्गराजगुरूत्तमम्।
रामानुजार्यमात्रेयं प्रणतार्तिहरं गुरुम्॥

श्रीमल्लक्ष्मणयोगीन्द्रं श्रीपूर्णं यामुनं मुनिम्।
श्रीरामपुण्डरीकाक्षौ श्रीमन्नाथशठद्विषौ॥

सेनेशलक्ष्मीलक्ष्मीशानपि येषां प्रसादतः।
रहस्यत्रयसारे मे समुदञ्चति शेमुषी॥

विगाहेनिगमान्तार्यविष्णुपादसमुद्भवाम्।
रहस्यत्रयसाराख्यां त्रिस्रोतसमकल्मषाम्॥

अविज्ञातं विजानतां विज्ञातं अविजानताम्।
रहस्यत्रयसाराख्यं परंब्रह्मास्तु मे हृदि॥



www.prapatti.com

शीरोन्रु तूप्पुल् तिरुवेङ्कटमुडैयान्
    पारोन्रच्चोन्न पळमोळियुळ् - ओरोन्रु
ताने अमैयादो तारणियिल् वाऴ्वाक्कु
    वानेर प्पोमळवुं वाऴ्वु॥

वैशाखे रोहिणीजातं काश्यपान्वयवारिधेः।
इन्दुं श्रीपुण्डरीकाक्षं गोष्ठीपूर्णमहं भजे॥

श्रीमते रघुवीरमहादेशिकाय नमः

श्रीमते गोपालदेशिकमहादेशिकाय नमः

श्रीमते श्रीनिवासमहादेशिकाय नमः

श्रीमते रङ्गनाथमहादेशिकाय नमः

श्रीमते श्रीनिवासमहादेशिकाय नमः

श्रीमते नारायणमहादेशिकाय नमः

श्रीमते श्रीनिवासमहादेशिकाय नमः

श्रीमते श्रीनिवासरामानुजमहादेशिकाय नमः

श्रीमते वेदान्तरामानुजमहादेशिकाय नमः

श्रीमते गोपालार्यमहादेशिकाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमते भगवते भाष्यकाराय महादेशिकाय नमः

श्रीमत् यामुनमुनये नमः

श्रीमन्नाथमुनये नमः

श्रीमते वकुळभूषणमहादेशिकाय नमः

www.prapatti.com

श्रीमते विष्वक्सेनाय नमः

श्रियै नमः

श्रीधराय नमः

श्रीरङ्गनायक्यैः नमः

श्रीरङ्गनाथपरब्रह्मणे नमः

श्रीरङ्गनाथ दिव्यमणि पादुकाभ्यां नमः

श्रीमते गोपालदेशिकमहादेशिकाय नमः

श्रीमते रघुवीरमहादेशिकाय नमः

॥ इति श्रीपौण्डरीकपुरं श्रीमदाण्डवन् आश्रम तनियन् सम्पूर्णम् ॥

www.prapatti.com